केन्द्रीय विद्यालय संगठन, लखनऊ संभाग (SET-1)

कक्षा – सप्तमी   सत्रांत परीक्षा (सत्र- 2022-23)

अवधिः – 02घंटे 30मिनट   विषय- संस्कृत   पूर्णांकः – 60

नाम.........................................कक्षा/वर्ग............................दिनांकः...........................

अनुक्रमांक........................कक्ष निरीक्षक हस्ताक्षर.......................परीक्षक हस्ताक्षर......................

खण्ड 'क' अपठित अवबोधनम्**(8** अंकाः**)**

प्रश्न-1. अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत-

भारत देशः महान् देशः अस्ति | अस्य विशाल-सीमा अस्ति| उत्तरस्याम् पर्वतराज: हिमालयः अस्ति| हिमालयस्य शाखा: प्रशाखा: पूर्व-पश्चिम-दिशयो: प्रसृता: सन्ति| हिमालयः भारतं प्रहरी इव रक्षति|

भारतस्य दक्षिण- दिशायां पूर्वदिशायां पश्चिमदिशायां च सिन्धुमहोदधि: वर्तते| अयं सागरः भारतमातु: पादौ प्रक्षालयति| सागरात् उत्थिता: मेघा: सम्पूर्ण देशे वर्षन्ति| ते महद् अन्नं उत्पादयन्ति|

I. एकपदेन उत्तरत- 1x2=2

(1) कः महान् देशः अस्ति?

……………………………………………………………………………………………..

(2) कस्य सीमा विशाला अस्ति?

……………………………………………………………………………………………..

II. पूर्णवाक्येन उत्तरत- 2x2=4

(1) कः भारतं प्रहरी इव रक्षति?

………………………………………………………………………………………………

(2) सागरात् उत्थिता: मेघा: कुत्र वर्षन्ति?

………………………………………………………………………………………………

III. यथानिर्देशम् उत्तरत- 1/2x 4=2

(1) 'वर्षन्ति' इति क्रियापदस्य किम् कर्तृपदम् अस्ति?

i)मेघा:   ii) सागरः   iii) हिमालयः   iv) शाखा:   ……………………..

(2) 'शाखा' इति कर्तृपदस्य किम् क्रियापदम् अस्ति?

i)अस्ति   ii) सन्ति   iii) रक्षति   iv) वर्षन्ति   …………………………

(3) 'हिमालयः भारतं प्रहरी इव रक्षति'अस्मिन् वाक्ये किम् अव्ययपदम् अस्ति?

i)हिमालयः ii) भारतं  iii) प्रहरी iv) इव   ……………………………..

(4) 'पर्वतराज: हिमालयः ' अत्र विशेषणपदम् किम् अस्ति?

i)अत्र   ii) पर्वतराज:   iii) हिमालयः   iv) अस्ति…………………………………

खण्ड 'ख' रचनात्मकम् कार्यम्(10 अंकाः)

प्रश्न**.2** निम्नचित्रं दृष्ट्वा मञ्जूषापदसहायतया पञ्च वाक्यानि रचयत   **1x5=5**

मञ्जूषा - (अध्यापिका, छात्राः, पठनं, कक्षायां, करोति, कुरुतः, कुर्वन्ति, शिक्षयति, छात्रे, अस्ति, हरितपट्टः )



_______________________________________________

_______________________________________________

_______________________________________________

प्रश्न.3 मन्जूषात समुचित पदानि चित्वा कथाम पूरयत – ½ x 10= 5

| नीत्वा , टोपिकाम्, एकं , व्यापारी, टोपिकानां , आगत्य , एकस्य , वृक्षस्य , तदा ,वृक्षे |
|---|

एकः (1) ................ व्यापारार्थं एकं नगरं आगच्छत् | सः (2)……….......... विक्रयं करोति स्म | सः विश्रामाय (3)....................वृक्षस्य नीचैः स्वपिति एकः वानरः (4) ………...... टोपिकां नीत्वा वृक्षं आरोहत् | यदा सः व्यापारी उतिष्ठति (5)................स्वटोपिकां न पश्यति | तदैव तस्य दृष्टिः (6)................. उपरि पतति | तत्र एक वानरः तस्य टोपिकां धृत्वा (7).............. तिष्ठति स्म | तदा व्यापारी (8).................उपायं चिन्तयति | सः व्यापारी अन्यां टोपिकां (9)............... भूमौ क्षिपति | वानरः अपि टोपिकां क्षिपति | सः व्यापारी (10).............. प्राप्नोति |

## खण्ड 'ग' अनुप्रयुक्त व्याकरणं (12 अंकाः)

प्रश्न: 4 पर्याय-पदानि योजयत- 1/2x4 =2

(1) गगने जलद:

(2) विमले निशाकर:

(3) चन्द्र: आकाशे

(4) अम्बुद: निर्मले

1_______________________________________________

2_______________________________________________

3_______________________________________________

4_______________________________________________

प्रश्न-5 . विशेषणपदैः सह विशेष्य पदानि योजयत- ½ x4=2

(1) सर्वेषाम् बालिकानाम्
(2) मौलिकः बालकानाम्
(3) एषा अधिकारः
(4) सर्वासाम् अल्पवयस्का

1_______________________________________________

2_______________________________________________

3_______________________________________________

4_______________________________________________

प्रश्न-6. कोष्ठकात् समुचितं पदम् चित्वा रिक्तस्थानानि पूरयत- 1x4=4

(1) ________नमः| (हरिं/हरये)

(2) ________परितः कृषिक्षेत्राणि सन्ति| (ग्रामस्य/ग्रामं)

(3) ________ नमः| (अम्बाया:/ अम्बायै)

(4) ________उपरि अभिनेता अभिनयं करोति| (मञ्चस्य/मञ्चम्)

प्रश्न-7. संधि विच्छेदम् कुरुत - 1 x4 = 4

(1) ग्रामं प्रति = ग्रामं + __________

(2) कार्यार्थम् = _________+ अर्थम्

(3) करिष्यत्येषा = करिष्यति + __________

(4) स्वकार्याणि = _________+ कार्याणि

## खण्ड 'घ' पठित अवबोधनम् (20 अंकाः)

प्रश्न-8. अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत- 3 अंक

पुरा एकस्मिन् वृक्षे एका चटका प्रतिवसति स्म| कालेन तस्या: सन्ततिः जाता| एकदा कश्चित् प्रमत्त:गज:तस्य वृक्षस्य अध:आगत्य तस्य शाखांशुण्डेन अत्रोटयत्| चटकाया: नीडं भुवि अपतत्| तेन अण्डानि विशीर्णानि |

I.एकपदेन उत्तरत- (1/2 x2 =1)

(क)वृक्षे का प्रतिवसति स्म?

…………………………………………………………………………………………………………………………………………………

(ख)गज: शुण्डेन किम् अत्रोटयत् ?

…………………………………………………………………………………………………………………………………………………

II. पूर्णवाक्येन उत्तरत- (1 x1 =1)

(1) किम् भुवि अपतत्?

…………………………………………………………………………………………………………………………………………………

III.यथानिर्देशम् उत्तरत - (1/2 x2 =1)

1- "भूमौ" इति शब्दस्य समानार्थकम् पदमगद्यांशात् चित्वा लिखत|

……………………………………………………………………………………………………………………………………

2- "प्रमत्तःगजः" अत्र विशेष्य पदम् किम्?

……………………………………………………………………………………………………………………..

प्रश्न-9. अधोलिखितं पद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत- 3 अंक

धेनु: प्रातर्यच्छति दुग्धम्|
शुद्धं स्वच्छं मधुरं स्निग्धं ||
गहने विपिने व्याघ्रो गर्जति|
उच्चैस्तत्र च सिंह: नर्दति||

I.एकपदेन उत्तरत- (1/2 x2 =1)

(क)धेनु: किम् यच्छति?

……………………………………………………………..

(ख)व्याघ्रः कुत्र गर्जति ?

……………………………………………………………

II. पूर्णवाक्येन उत्तरत- (1x1 = 1)

(1) धेनु: कीदृशम् दुग्धं यच्छति?

…………………………………………………………………………………….

III.यथानिर्देशम् उत्तरत - (1/2 x2=1)

1- "वने" इति शब्दस्य समानार्थाकम् पदमगद्यांशात् चित्वा लिखत|

……………………………………………………………………………………………………………

2- "नीचै:" अस्य पदस्य विलोम पदम् अत्र किम् प्रयुक्तम्?

.

……………………………………………………………………………………………..

प्रश्न-10. रेखांकितपदानि आधृत्य प्रश्ननिर्माणं कुरुत- (1 x4 =4)

(क) मृत्यु: न प्रतीक्षते। ……………………………………………………………………..

(ख) व्यवहारे मृदुता श्रेयसी । ………………………………………………………………….

(ग) सर्वदा व्यवहारे ऋजुता विधेया।

……………………………………………………………………………………….

(घ) कलहं कृत्वा नर: दु: खी भवति।

……………………………………………………………………………………..

प्रश्न-11. उपयुक्तकथानानां समक्षं 'आम्'अनुपयुक्तकथानानां समक्षं 'न' इति लिखत- (1/2 x4=2)

(1) अनृतं ब्रूयात् | ( )

(2) श्वः कार्यम् अद्य कुर्वीत| ( )

(3) विद्याधनं सर्वधनेषु प्रधानम्| ( )

(4) विदेश गमने विद्या बंधुजनः न भवति| ( )

प्रश्न: 12 . श्लोकान्शान् योजयत - 1 x4 = 4

| | |
|---|---|
| 1) धनधान्यप्रयोगेषु | त्यक्तलज्ज: सुखी भवेत। |
| 2) विस्मयो न हि कर्तव्यो | सत्येन तपते रवि: | |
| 3) सत्येन धार्यते पृथ्वी | बहुरत्ना वसुंधरा | |
| 4) आहारे – व्यवहारे च | विद्याया: संग्रहेषु च | |

1______________________________________________

2______________________________________________

3______________________________________________

4______________________________________________

प्रश्न 13. मंजूषात: पदानि चित्वा रिक्त स्थानानि पूरयत- ½ x8 =4

अष्टाविंशति: , षड् , अष्ट, त्रिंशत् , द्वे , द्वादश, द्वौ, एकत्रिंशत्,

1) ................. ऋतवः भवन्ति|

2) मासाः ..............भवन्ति|

3) एकस्मिन् मासे ..................अथवा..............दिवसाः भवन्ति|

4) फरवरी-मासे सामान्यतः.........दिनानि भवन्ति|

5) मम शरीरे ...................हस्तौ ---------------- नेत्रे स्तः|

6) कृष्णमूर्तेः ............................ कर्मकराः आसन् ।

**सी.सी.टी. (10)**

प्रश्न 14 अधोलिखितं गद्याशं पठित्वा प्रश्नानां उत्तराणि लिखत - 2x5=10

सर्वेषु धनेषु विद्याधनम् एव उत्तमं धनं मन्यते। विद्यया एव जनाः जानन्ति यत् किं कर्तव्यम् अस्ति किं च अकर्तव्यम्। अनया एव ज्ञायते यत् किम् उचितम् अस्ति किं च अनुचितम्। विद्याधनेन एव वयं जानीमः यत् कः सन्मार्गः अस्ति कः च कुमार्गः। विद्यया एव मनुष्य संसारे सम्मानं प्राप्नोति विद्याधनाय वारं वारं नमः।

i. किं धनम् उत्तमं मन्यते ?
ii. कया मनुष्य सम्मानं प्राप्नोति ?
iii. मनुष्यः सम्मानं कुत्र प्राप्नोति?
iv. विद्या किं ज्ञायते ?
v. उचित – अनुचितस्य ज्ञानं कथं भवति?

1______________________________________________________________

2______________________________________________________________

3______________________________________________________________

4______________________________________________________________

5_____________________________________________________________